यदि न ददाति तदा मूलनाशः । ‘विनष्टे मूलनाशः स्याद्दैवराजकृताद्दृते ।’ इति नारदवचनात् । दैवराजकृताद्दृते । दैवमग्न्युदकदेशोपप्लवादि । दैवकृताद्विनाशादिना । तथा स्वापराधरहिताद्राजकृतात् । दैवराजकृते तु विनाशे सवृद्धिकं मूल्यं दातव्यमधमर्णेनाध्यन्तरं वा यथाह ।

“स्रोतसापहृते चैत्रे राज्ञा चैवापहारिते ।
आधिरन्योऽथ कर्त्तव्यो देयं वा धनिने धनमिति ॥”

तत्र स्रोतसापहृत इति दैवकृतोपलक्षणम् ।
अपि च ।

“आधेः स्वीकरणात् सिद्धी रक्ष्यमाणोऽप्यसारताम् ।
यातश्चेदन्य आधेयो धनभाग्वा धनी भवेत् ॥”

आधेर्गोप्यस्य भोग्यस्य च स्वीकरणादुपभोगादाधिग्रहणसिद्धिर्न साक्षिलिखनमात्रेण नाप्युद्देशमात्रेण यथाह नारदः ।

“आधिस्तु द्विविधः प्रोक्तो जङ्गमः स्थावरस्तथा ।
सिद्धिरस्योभयस्यापि भोगो यद्यस्ति नान्यथा ॥”

अस्य च फलम् ।

“आधौ प्रतिग्रहे क्रीते पूर्व्वा तु बलवत्तरेति ।”

या स्वीकारान्ता क्रिया सा पूर्व्वा बलवती स्वीकाररहिता तु पूर्व्वापि न बलवतीति स चाधिः प्रयत्नेन रक्ष्यमाणोऽपि कालवशेन यद्यसारतामविकृत एव सवृद्धिकमूल्यद्रव्यापर्य्याप्ततां गतस्तदाधिरन्यः कर्त्तव्यः । धनिने वा धनं देयं रक्ष्यमाणोऽप्यसारतामिति वदता आधिः प्रयत्नेन रक्षणीयो धनिनेति ज्ञापितम् । आधिः प्रणश्येद्द्विगुणे इत्यस्यापवादमाह ।

“चरित्रबन्धककृतं सवृद्ध्या दापयेद्धनम् ।
सत्यङ्कारकृतं द्रव्यं द्विगुणं प्रतिदापयेत् ॥”

चरित्रं शोभनाचरितम् । चरित्रेण बन्धकं चरित्रबन्धकम् । तेन यत् द्रव्यमात्मसात् कृतं पराधीनं वा कृतम् । एतदुक्तं भवति धनिनः स्वच्छाशयत्वेन बहुमूल्यमपि द्रव्यमाधीकृत्याधमर्णेनाल्पमेव द्रव्यमात्मसात् कृतम् । यदि वाधमर्णस्य स्वच्छाशयत्वेनाल्पमूल्यमाधिं गृहीत्वा बहुद्रव्यमेव धनिनाधमर्णाधीनं कृतमिति तद्धनं नृपो वृद्ध्या सह दापयेत् अयमाशयः एवंरूपं बन्धकं द्विगुणीभूतेऽपि द्रव्ये न नश्यति किन्तु द्रव्यमेव द्विगुणं दातव्यमिति । तथा सत्यङ्कारकृतं करणं कारः भावे घञ् सत्यस्य कारः सत्यङ्कारः कारे सत्यागदस्येति मुम् सत्यङ्कारेण कृतं सत्यङ्कारकृतम् । अयमभिसन्धिः । यदा बन्धकार्पणसमय एव इत्थं परिभाषितं द्विगुणीभूतेऽपि द्रव्ये मया द्विगुणं द्रव्यमेव दातव्यम् । नाधिनाश इति तदा तद्द्विगुणं दापयेदिति । अन्योऽर्थः । चरित्रशब्देन गङ्गास्नानाग्निहोत्रादिजनितमपूर्व्वमुच्यते यत्र तदेवाधीकृत्य यत् द्रव्यमात्मसात् कृतम् । तत्र तदेव द्विगुणीभूतं दातव्यं नाधिनाश इति । आधिप्रसङ्गादन्यदुच्यते । सत्यङ्कारकृतमिति क्रयविक्रयादिव्यवस्थानिर्व्वाहणाय यदङ्गुलीयकादि परहस्ते कृतं तद्व्यवस्थातिक्रमे द्विगुणं दातव्यं तत्रापि येनाङ्गुलीयकाद्यर्पितं स एव चेद्व्यवस्थातिवर्त्ती तेन तदेव हातव्यम् । इतरश्चेद्व्यवस्थातिवर्त्ती तदा तदेवाङ्गुलीयकादि द्विगुणं प्रतिदापयेदिति । किञ्च ।

“उपस्थितस्य मोक्तव्य आधिः स्तेनोऽन्यथा
भवेत् ।
प्रयोजकेऽसति धनं कुलेऽन्यस्याधिमाप्नुयात् ॥”

धनदानेनाधिमोचणायोपस्थितस्याधिर्मोक्तव्यो धनिना वृद्धिलोभेन न स्थापयितव्यः । अन्यथा अमोचणे स्तेनश्चौरवद्दण्ड्यो भवेत् असन्निहिते पुनःप्रयोक्तरि कुले तदाप्तहस्ते सवृद्धिकं धनं निधायाधमर्णः स्वीयं बन्धकं गृह्णीयात् । अथ प्रयोक्ताप्यसन्निहितस्तदाप्ताश्च धनस्य गृहीतारो न सन्ति यदि वा असन्निहिते प्रयोक्तरि आधिविक्रयेण धनदित्साधमर्णस्य तत्र किं कर्त्तव्यमित्यपेक्षित आह ।

“तत्कालकृतमूल्यो वा तत्र तिष्ठेदवृद्धिकः ।”

तस्मिन् काले यत्तस्याधेर्मूल्यं तत् परिकल्प्य तत्रैव धनिनि तमाधिं वृद्धिरहितं स्थापयेन्न तत ऊर्द्ध्वं धनं वर्द्धते यावद्धनी धनं गृहीत्वा तमाधिं मुञ्चति यावद्वा तन्मूल्यद्रव्यमृणिने प्रवेशयति । यदा तु द्विगुणीभूतेऽपि धने द्विगुणं धनमेव गृहीतव्यं न त्वाधिनाश इति विचारितमृणग्रहणकाल एव तदा द्विगुणीभूते द्रव्ये असन्निहिते वाधमर्णे धनिना किं कर्त्तव्यमित्यत आह ।

“विनाधारणकाद्वापि विक्रीणीत ससाक्षिकम् ।”

धारणकादधमर्णाद्विना अधमर्णे असन्निहिते साक्षिभिस्तदाप्तैश्च सह तमाधिं विक्रीय तद्धनं गृह्णीयाद्धनी वाशब्दो व्यवस्थितविकल्पार्थः । यदर्णग्रहणकाले द्विगुणीभूतेऽपि धने धनमेव गृहीतव्यं न त्वाधिनाश इति न विचारितम् । तदा आधिः प्रणश्येद्द्विगुणे इत्यस्याधिनाशः । विचारिते त्वयं पक्ष इति ॥ * ॥ भोग्याधौ विशेषमाह ।

“यदा तु द्विगुणीभूतमृणमाधौ तदा खलु ।
मोच्य आधिस्तदुत्पन्ने प्रविष्टे द्विगुणे धने ॥”

यदा प्रयुक्तं धनं स्वकृतया वृद्ध्या द्विगुणीभूतं तदाधौ कृते तदुत्पन्ने आध्युत्पन्ने द्विगुणे धनिनः प्रविष्टे धनिनाधिर्मोक्तव्यः । यदि वादावेवाधौ दत्ते द्विगुणीभूते द्रव्ये त्वयाधिर्मोक्तव्य इति परिभाषया कारणान्तरेण वा भोगाभावेन तदा द्विगुणीभूतमृणान्तदाधौ भोगार्थं धनिनि प्रविष्टे तदुत्पन्ने द्रव्ये द्विगुणे सत्याधिर्मोक्तव्यः । अधिकोपभोगे तदपि देयम् । सर्व्वथा सवृद्धिकमूल्यर्णापाकरणार्थाध्युपभोगविषयमिदं वचनम् । तमेनं चयाधिमाचक्षते लौकिकाः यत्र तु वृद्ध्यर्थ एवाध्युपभोग इति परिभाषा तत्र द्वैगुण्यातिक्रमेऽपि यावन्मूल्यदानं तावदुपभुङ्क्ते एवाधिम् एतदेव स्पष्टीकृतं वृहस्पतिना

“——————ऋणी बन्धमवाप्नुयात् ।
फलभोग्यं पूर्णकालं दत्त्वा द्रव्यञ्च सामकम् ॥
यदि प्रकर्षितं तत् स्यात्तदा न धनभाग्धनी ।
ऋणी च न लभेद्बन्धं परस्परमतं विना ॥”

अस्यार्थः । फलं भोग्यं यस्यासौ फलभोग्यो बन्ध आधिः स च द्विविधः सवृद्धिकमूल्यापाकरणार्थो वृद्धिमात्रापाकरणार्थश्च तत्र च वृद्धिमूल्यापाकरणार्थं बन्धं पूर्णकालं पूर्णः कालो यस्यासौ पूर्णकालस्तमाप्नुयादृणी । यदा सवृद्धिकं मूल्यं फलद्वारेण धनिनः प्रविष्टन्तदा बन्धमवाप्नुयादित्यर्थः वृद्धिमात्रापाकरणार्थन्तु बन्धं सामकं दत्त्वाप्नुयादृणी । समं मूल्यं सममेव सामकम् । अस्यापवादमाह । यदि प्रकर्षितं तत् स्यात्तद्बन्धकं प्रकर्षितमतिशयितं वृद्धेरभ्यधिकफलं यदि स्यात्तदा न धनभाग्धनी । सामकं न लभेद्बन्धं मूल्यमदत्त्वैवर्णी बन्धमवाप्नुयादिति यावत् । अथाप्रकर्षितं तद्बन्धकं वृद्धयेऽप्यपर्य्याप्तन्तदा सामकं दत्त्वापि बन्धं लभेताधमर्णः वृद्धिशेषमदत्त्वैव लभेतेत्यर्थः । पुनरुभयत्रापवादमाह । परस्परमतं विना उत्तमर्णाधमर्णयोः परस्परानुमत्यभावे यदि प्रकर्षितं इत्याद्युक्तम् । परस्परानुमतौ तूत्कृष्टमपि बन्धकं यावन्मूल्यदानन्तावदुपभुङ्क्ते धनी निकृष्टमपि मूलमात्रदाने नैवाधमर्णो लभते । इति मिताक्षरा ॥

बन्धकः, पुं, (बन्ध + स्वार्थे कन् ।) विनिमयः । इति विश्वमेदिन्यौ ॥ आधिः । इति शब्दरत्नावली ॥ रतहिण्डकः । इति नानार्थरत्नमाला ॥ (बध्नातीति । बन्ध + ण्वुल् । बन्धनकर्त्तरि, त्रि । यथा, देवीभागवते । ५ । १ । ३६ ।

“ न नारी न धनं गेहं न पुत्रा न सहोदराः ।
बन्धनं प्राणिनां राजन्नहङ्कारस्तु बन्धकः ॥”)

बन्धकी, स्त्री, (बध्नाति मानसमिति । बन्ध + ण्वुल् । गौरादित्वात् ङीष् ।) पुंश्चली । इत्यमरः । २ । ६ । १० ॥ (यथा, मार्कण्डेयपुराणे । ३४ । ८८ ।

“न बन्धकीभिर्न न्यूनैर्बन्धकीपतिभिस्तथा ॥”)

इभी । इति मेदिनीहेमचन्द्रौ ॥ पञ्चपुरुषगामिनी । (यथा, महाभारते ।१।१२३।७४।

“नातश्चतुर्थं प्रसवमापत्स्वपि वदन्त्युत ।
अतःपरं स्वैरिणी स्याद्बन्धकी पञ्चमे भवेत् ॥”)

बन्धनं, क्ली, (बन्ध + भावे ल्युट् ।) बन्धनक्रिया । बाँधा इति भाषा । तत्पर्य्यायः । उद्दानम् २ । इत्यमरः । २ । ८ । २६ ॥ कङ्कनम् ३ बन्धः ४ संयमनम् ५ । इति शब्दरत्नावली ॥ (यथा, हितोपदेशे । १ । ६५ ।

“आपदामापतन्तीनां हितोऽप्यायाति हेतुताम् ।
मातृजङ्घा हि वत्सस्य स्तम्भीभवति बन्धने ॥”)

वधः । इति मेदिनी । ने, ६७ ॥ हिंसा । इति शब्दरत्नावली ॥ रज्जुः । इति हेमचन्द्रः ॥ बध्यतेऽनेनेति करणव्युत्पत्त्या त्रि ॥ (बध्यतेऽस्मिन् इति अधिकरणे ल्युट् । कारागारम् । बन्धनस्थानम् । यथा, भागवते ।३।२।२५।